पञ्चदशः पाठः

# विश्ववन्दिता वैशाली

['विश्ववन्दिता वैशाली' 'इति शीर्षकं पद्यम् आधुनिकभाषाशैलीम् अनुसृत्य विरचितं वर्तते। अत्र वैशालीमहत्त्वं संक्षिप्ततया वर्णितम् अस्ति। रामायणपुराणादिषु विशाला मिथिला-तीरभुक्ति-विदेहादिनामभिः विख्यातं गण्डकीगङ्गाकौशिकीहिमालयपरिवृते क्षेत्रमेव कालान्तरे 'वैशाली' नाम्ना इतिहासे प्रसिद्धं बभूव। गणतन्त्रस्य प्रथमसूर्योदयः वैशालीधरायां जातः, यस्य दिव्यप्रकाशेन समस्तसंसारे गणतन्त्रं प्रसृतं विकसितं च। एतादृशभाव-भूमौ गीतमिदं रोचकं वृत्तान्तं प्रस्तौति।]

**प्रवहति गङ्गा दक्षिणभागे शुभा गण्डकी पश्चिमभागे ।**
**नृपविशालकुलपुरी वरेण्या विश्ववन्दिता वैशाली ॥1॥**

**पुरा विशाला नगरी रम्या सस्यश्यामला अरिभिरगम्या ।**
**रामलक्ष्मणाभ्यां विलोकिता विश्ववन्दिता वैशाली ॥2॥ ...... विश्व .............**

**या सीता-जनिका विशिष्यते या जिनेन्द्रजननी प्रशस्यते ।**
**या विदेहजनकादिसेविता विश्ववन्दिता वैशाली ॥3॥ ...... विश्व .............**

**यस्यां बुद्धकृता उपदेशाः सत्याहिंसादिकसन्देशाः ।**
**आम्रपालिका कलासाधिका विश्ववन्दिता वैशाली ॥4॥ ...... विश्व .............**

**यत्राशोक-निर्मितः स्तूपः स्तम्भः पुष्करिणी अथ कूपः ।**
**यस्या धरा कीर्तिमातनुते विश्ववन्दिता वैशाली ॥5॥ ...... विश्व .............**

**यत्र लिच्छिवी-बज्जिक-संघाः गणनिष्ठाः सुधियश्च गुणौघाः ।**
**प्रजापालने ते विख्याताः विश्ववन्दिता वैशाली ॥6॥ ...... विश्व .............**

**शासनविधौ प्रकृष्टं तन्त्रम् संविधानसहितं गणतन्त्रम् ।**
**यस्य समुदयो यत्र प्रथमतः विश्ववन्दिता वैशाली ॥7॥ ...... विश्व ............**

**यत्र जनानां वरं जनेभ्यः जनैः शासनं प्रियं समेभ्यः ।**
**जनतन्त्रं गणतन्त्र-दिशैव विश्ववन्दिता वैशाली ॥8॥ ...... विश्व ............**

## शब्दार्थाः

| | | |
|---|---|---|
| **वरेण्या** | श्रेष्ठा | उत्तम |
| **तन्त्रम्** | अधीनम्/ शासनम् | शासन |
| **रम्या** | रमणीया | सुन्दर |
| **जनिका** | जन्मदात्री | माता |
| **जिनेन्द्रः** | महावीरः | जिनेन्द्र भगवान महावीर |
| **बुद्धकृताः** | बुद्धप्रदत्ताः | बुद्ध द्वारा दिये गये |
| **आम्रपालिका** | आम्रपाली | वैशाली की प्रसिद्ध गणिका आम्रपाली |
| **स्तूपः** | गोलाकारं स्मारक-स्थलम् | बौद्धों का गोलाकार स्मारक |
| **स्तम्भः** | स्थूलदण्डरूपः उत्थितः यूपः | खम्भा |
| **पुष्करिणी** | तडागः | तालाब |
| **सुधियः** | विद्वांसः | विद्वान लोग |

## व्याकरणम्

### ( क ) सन्धिविच्छेदः

**गुणौघाः** = गुण + ओघाः

**दिशैव** = दिशा + एव

**जिनेन्द्रः** = जिन + इन्द्रः

**अरिभिरगम्या** = अरिभिः + अगम्या

## ( ख ) समासः

| | | |
|---|---|---|
| **विश्ववन्दिता** | = | विश्वेन वन्दिता (तृतीया तत्पुरुष) |
| **दक्षिणभागे** | = | दक्षिणः भागः (कर्मधारय) तस्मिन् |
| **नृपविशालकुलपुरी** | = | नृपः विशालः नृपविशालः (कर्मधारय) तस्य कुलम् नृपविशालकुलम् षष्ठी तत्पुरुष (तस्य पुरी नृपविशालकुलपुरी (षष्ठी तत्पुरुष) |
| **सस्यश्यामला** | = | सस्यैः श्यामला (तृतीया तत्पुरुष) |
| **रामलक्ष्मणाभ्याम्** | = | रामश्च लक्ष्मणश्च रामलक्ष्मणौ (द्वन्द्वसमासः) ताभ्याम् |
| **सीताजनिका** | = | सीतायाः जनिका (षष्ठी तत्पुरुष) |
| **जिनेन्द्रजननी** | = | जिनेन्द्रस्य जननी (षष्ठी तत्पुरुष) |
| **विदेहजनकादिसेविता** | = | विदेहः जनकः विदेहजनकः (कर्मधारय) सः आदिर्यस्य तैः सेविता (तृतीया तत्पुरुष) |
| **बुद्धकृता** | = | बुद्धेन कृता (तृतीया तत्पुरुष) |
| **सत्याहिंसादिकसंदेशा** | = | सत्यश्च अहिंसा च सत्याहिंसे (द्वन्द्व) आदी येषां ते संदेशाः सत्याहिंसादिक संदेशाः (बहुब्रीहि, कर्मधारयः) |
| **लिच्छिवीबज्जिकसंघाः** | = | लिच्छिवी च बज्जिकाश्च लिच्छिवीबज्जिकाः (द्वन्द्व) तेषाम् संघा लिच्छिवीबज्जिकासंघाः (षष्ठी तत्पुरुष) |
| **गणनिष्ठाः** | = | गणेषु निष्ठा येषां ते (बहुव्रीहि) |
| **गुणौघाः** | = | गुणानाम् ओघाः गुणौघाः (षष्ठी तत्पुरुष) |
| **प्रजापालने** | = | प्रजानाम् पालने प्रजापालने (षष्ठी तत्पुरुष) |
| **गणतन्त्रम्** | = | गणानाम् तन्त्रम् अधीनम् शासनम् (षष्ठी तत्पुरुष) |
| **शासनविधौ** | = | शासनस्य विधौ (षष्ठी तत्पुरुष) |
| **संविधानसहितम्** | = | संविधानेन सहितम् (तृतीया तत्पुरुष) |

## अभ्यासः ( मौखिकः )

1. **संस्कृतभाषया एकपदेन उत्तराणि लिखत–**

(क) का विश्ववन्दिता अस्ति?

(ख) काभ्याम् वैशाली विलोकिता?

(ग) कस्य जननी प्रशस्यते?

(घ) के सन्देशाः?

(ङ) केन स्तूपः निर्मितः?

## अभ्यासः ( लिखितः )

1. **संस्कृतभाषया एकपदेन उत्तराणि लिखत–**

(क) का मोक्षदा?

(ख) गङ्गा कस्मिन् भागे प्रवहति?

(ग) कस्याम् बुद्धकृता उपदेशाः?

(घ) प्रजापालने के विख्याताः?

(ङ) गणतन्त्रं केषां कृते शासनं भवति?

2. **अधोलिखितवाक्येषु अधोरेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत–**

(क) शुभा गण्डकी <u>पश्चिम</u>भागे प्रवहति।

(ख) विशालानगरी <u>अरिभि</u>रगम्या।

(ग) स्तूपः <u>कीर्ति</u>मातनुते।

(घ) प्रथमतः <u>वैशाल्याम्</u> गणतन्त्रस्य प्रादुर्भावः।

(ङ) जिनेन्द्रजननी प्रशस्यते।

**3. समुचितपदैः रिक्तस्थानानि पूरयत–**

(क) शासनविधौ ……………… तन्त्रम्।

(ख) यत्र ……………… वरं जनेभ्यः।

(ग) ……………… ते विख्याताः।

(घ) जनैः शासनम् प्रियम् ……………… ।

(ङ) आम्रपालिका कलासाधिका ……………… वैशाली।

**4. स्तम्भद्वये लिखितानां विपरीतार्थकशब्दानां मेलनं कुरुत–**

| | | | |
|---|---|---|---|
| (क) | विशालः | (i) | हिंसा |
| (ख) | नृपः | (ii) | अप्रियः |
| (ग) | वन्दिता | (iii) | अपयशः |
| (घ) | अहिंसा | (iv) | अरम्या |
| (ङ) | प्रियः | (v) | निरुदयः |
| (च) | यशः | (vi) | सम्प्रति |
| (छ) | गम्या | (vii) | संकीर्णः |
| (ज) | समुदयः | (viii) | प्रजाः |
| (झ) | रम्या | (ix) | निन्दिता |
| (ञ) | पुरा | (x) | अगम्या |

**5. निम्नलिखितेषु वाक्येषु रेखाङ्कि.तपदानां स्थाने कोष्ठात् उचितरूपम् आदाय प्रश्नं रचयत–**

(क) यस्याः यशः कीर्तिमातनुते। **( कस्य/ कस्याः )**

(ख) यस्याम् बुद्धकृताः उपदेशाः। (**कस्मिन्/ कस्याम्**)

(ग) या सीता जनिका विशिष्यते। (**कः/ का/ किम्**)

(घ) यस्य समुदयो यत्र प्रथमतः। (**कस्य/ कस्याः**)

(ङ) शुभा गंडकी पश्चिमभागे। (**कस्मिन्/ कस्याम्**)

**6. अधोलिखितेषु द्वे शुद्धे पर्यायपदे रेखाङ्कि.ते क्रियताम्–**

(क) **यशः** – कीर्तिः, कृतिः, समज्ञा

(ख) **नृपः** – राजा, भूपः, कूपः

(ग) **जनः** – ओकः, लोकः, नरः

(घ) **प्रजा** – जनता, सन्ततिः, विततिः

(ङ) **विद्यार्थी** – शिष्यः, अन्तेवासी, बालकः

**[ संस्कृते स्त्रवीत्वबोधनाय स्त्रीप्रत्ययस्य प्रयोगः भवति।**

**यथा– बाल + टाप् - बाला ]**

**7. निम्नलिखितम् उदाहरणम् अनुसृत्य स्त्रीप्रत्ययं लिखत।**

| स्त्रीप्रत्ययान्तप्रातिपदिकम् | मूलप्रातिपदिकम् | | स्त्रीप्रत्ययः |
|---|---|---|---|
| वरेण्या | वरेण्य | + | टाप् |
| सेविता | ............ | + | ............ |
| विलोकिता | ............ | + | ............ |
| अगम्या | ............ | + | ............ |

विशाला ............ + ............

## योग्यता-विस्तारः

वैशाली गणतन्त्रस्य जन्मभूमिः वर्तते। सम्प्रति बिहारराज्यस्य तीरभुक्ति (तिरहुत) प्रमण्डलस्य वैशाली नाम मण्डलं (जिला) वर्तते। एतस्य मुख्यालयः हरिपुरम् (हाजीपुरम्) अस्ति। इतः 15-20 किलोमीटर दूरे वैशाली अद्यापि स्वकीयं प्राचीनवैभवं निदर्शयति। वैशालीं परितः अनेकानि दर्शनीयस्थानानि सन्ति।

### ऐतिहासिकं महत्त्वम्–

(i) "वैशाली थ्रू द एजेज" इति डॉ० योगेन्द्रमिश्रस्य वैशाली विषयकम् इतिहासपुस्तकं पठित्वा ऐतिहासिकं महत्वं संक्षेपेण संग्रहणीयम्।

(ii) डॉ० गोविन्दठक्कुरस्य "मिथिला का इतिहास" इति पुस्तकं पठित्वा प्राचीनकालतः वैशाल्याः क्रमिकः इतिहासः ज्ञातव्यः।

### सांस्कृतिकं महत्त्वम्–

(i) अत्र आम्रपाली नाम नगरवधूः प्रतिष्ठाप्रकर्षं प्राप्तवती आसीत्। तस्याः गृहे भगवान् गौतमबुद्धः स्वयमेव आगत्य भोजनं स्वीकृतवान् आसीत्। महावीरस्य जैनतीर्थंकरस्य जन्मभूमिः वैशाली आसीत्। अत्र भगवान् बुद्धोऽपि अनेकवारम् आगतवान्।

(ii) बाल्मीकिरामायणे विशाला मिथिला चेति द्वे राज्ये पृथक् पृथक् शासकाभ्यां शासिते स्तः